संस्कृतकाव्यमाला—२

अनन्तभारती

डा० राळ्लपल्ली अनन्तकृष्णशर्मा

सुरभारती प्रकाशनम्, बेङ्गलूरु

श्रीकान्त पवर् प्रेस्, मैसूरु-४

Ananthabharathi—A compilation of Samskritha writings of Dr. R. Ananthakrishna Sharma, Edited & published by B. S. Ramakrishna Rao, M A. for Surabharathi Prakashanam, 12/1, upstairs, Seethapathy Agrahar, Bangalore-560 002

All rights reserved by the author.

मूल्यम् २-००

First Edition—1977

Printed at
Sree Kantha Power Press, 561, Ramachandra Agrahar,
Mysore-570 004

PREFACE

IT IS A FACT that we have neglected the *Samskrita Kavya* of modern times. Except Dr. V. Raghavan's booklet on contemporary Sanskrit literature, no good and authentic work on the said topic is available either in English or in any of the regional languages of India. The general public and the students of Samskrita are unaware of the fact that there are a good number of people amongst us who can speak, think and write in Samskrita. Now the time has come for the Samskritists to declare that they are living.

The causes for such a state of affair are many. To take the example of Karnataka, there is not even a single Library or a Book-shop entirely devoted to Samskrita. No modern work is prescribed in any of the schools or colleges even to those students who offer Samskrita as one of their special subjects. Even in Post-graduate courses not a single word will be uttered on this subject. To be brief—the existence of contemporary Samskrita poets is quite unheard of. But for the devoted efforts of Sri K. N. Varadaraja Iyengar, Editor "*Sudharma*", most of the people, methinks, would have doubted the *Svarupa Yogyata* of Samskrita. The fact that even under these circumstances there are thousands of people who are engaged in

composing *Samskrita Kavyas* is a thing to be appreciated. In case, some encouragement is given, I am sure, these poets will show not only that they are not inferior to the poets of other languages but they can even surpass them.

It is under the said circumstances that a few *Sahrudayas* in Bangalore have ventured to start the *Surabharathi Prakashanam* devoted to the publication of modern writings in Samskritha. It is our earnest appeal to the general public and the Sanskritists to encourage us to serve the cause of Samskrita.

It is a matter of great pleasure for the publisher to publish *Anantha Bharati*—a compilation of Samskritha writings of Dr. Anantha Krishna Sharma. Dr. Sharma (84) is wellknown in the fields of music and Telugu literature. But only a few people know that he is also a Samskrita poet of original talent and who has written a champu, a few poems, many articles and a number of kirtanas in Samskritha. His " *Mahisura-rajyabhyudayadarshah* " written in the year 1925 brought him the first prize in the competition conducted by H H Nalmadi Krishnaraja Wodeyar, the then Maharaja of Mysore. When I approached Dr. Sharma to bless and permit us to reprint his Samskritha writings he readily

accepted and blessed whole heartedly. The next thing was to collect his Samskrita writings most of which have already been lost. Dr. Sharma was the only resort and he actually dictated a few poems from his memory. But alas! I could not get his writings in entirely.

Afterwards I requested the various institutions which have published Dr. Sharma's writings in their journals. They have graciously permitted me to reproduce those articles. My thanks are due to Dr. V. Raghavan, Director, The Kuppaswami Sastri Research Institute, Madras and the Registrar, Sri Venkateswara University, Tirupathy for their timely co-operation. I need not, say anything about our gratitude to Dr. R Anantha Krishna Sharma. My thanks are also due to Sri H. V. Nagaraja Rao, Sri G. Aswathanarayan & Sri C. R. Ranganatha Rao for their timely help.

I will be failing in my duties if I do not prostrate before Sri K. N. Varadaraja Iyengar, Editor of Sudharma who is the main source of inspiration for this. His generous help in this regard, the untiring efforts of Sree Kantha Power Press, particulrly its Manager Sri K. S. Seshadri is indeed ineffable.

B. S. RAMAKRISHNA RAO

आ शं स न म्

निजपरपरिचोदनया कलितान् विविधेषु देशकालेषु ।
सुरभारती सुधाब्धौ समुत्क्षितान्मत्ककाव्यकणान् ॥

प्रसभं विचित्य संगृह्यार्पितवान् सम्पुटीमिमामद्य ।
श्रीरामकृष्णसूरिः निरुपधिभाषानियुक्तकैङ्कर्यः ॥

इयं तनोतु वाग्देव्याः मन्दस्मितकुतूहलम् ।
विनोदमपि सूरीणां सतां किमितरैः फलैः ॥

—राव्वलपल्लि अनन्तकृष्णशर्मा



Dr. R. Ananthakrishna Sharma

Photo courtesy : Sri K B. Somashekar, Bangalore.

॥ श्रीः ॥

श्रीमहिशूरराज्याभ्युदयादर्शः

श्रीमन्महीशूरमहाराजास्थान्यां दीपावल्युत्सबानु-
बन्धिन्याः कवितापरीक्षायाः पारितोषिकसभायां
क्रोधनवत्सरचैत्रशुक्लद्वितीयायां गुरुवासरे प्रवर्तितायां
राजाधिराज श्रीमत्कृष्णराजेन्द्रसार्वभौमसमलंकृतायां
संस्कृतभागे प्रथमबहुमानपदमधिरूढः
राळलपल्लि अनन्तकृष्णशर्मणः कृतिः
महिशूरराज्याभ्युदयादर्शाख्यः
लघुचम्पूप्रबन्धः ।

अभ्युदय सिद्धिषु सतामश्रान्तो विजयतां महान् यत्नः ।
येनैव हि विज्ञेयो भगवन्महिमाम्बुधौ कणोऽप्येकः ॥ १ ॥

अवतरणिका

गीतां चिरादद्यतनीं सुरर्षिभिः
संश्रुत्य कर्णाटकराज्यसंपदम् ।
सद्वस्तु नित्यप्रणयादभूत्पुनः
विश्वावसुर्दर्शनगाढकौतुकः ॥ २ ॥

असाधुसंभावनया निरीहमप्या-
कृष्य तं सौहृदपाशतो बलात् ।
कृशानुमारोप्य विमानपीठिकां
जवात्स भूलोकमवातरद्दिवः ॥ ३ ॥

तत्रैतौ मलयगिरेरधित्यकायां
भद्रश्रीसुरभिळसर्वदिङ्मुखायाम् ।
जीमूतैर्धवळवरूथिते विमाने
सोत्कण्ठौ निपुणमपश्यतां गवाक्षात् ॥ ४ ॥

गद्यम्—तस्य च गिरेरतिविस्तृततया समधरणीतल-निर्विशेषनिम्नोन्नतेषु नितम्बेषु यथायथं निविष्टैः, निर्माणेन्द्रजाललीलाविनोदिनो विधातुर्हस्तमायायन्त्राद्विकीर्णैरिव विविधैः क्रीडनकैः, दवीयस्तया संकुचितरूपरेखादृश्यैरपि निजदिव्यचक्षुषोऽवश्यगोचरसकलावयवैः, ग्रामनिगमनगरारामगहनतटिनीतटाकैरुदीर्णवैभवं, कर्णाटदेशकमलकर्णिकां महासुकृतिमात्रभोज्यं महीशूरराज्यं, विस्मयविकसितेन वदनेन, प्रमोदमत्तेन चित्तेन च मूकमिव जोषं निध्यायन्तमवेक्ष्य विश्वावसुं, जुगुप्सासंकुचितभ्रूदुर्दर्शमुखः कुशानुरेवमुवाच—

दोषदर्शनम्

अकाण्डसुलभानन्दं मौर्ख्यमेतादृशं तव ।
कतमस्य परीणामो न जाने पुण्यपापयोः ॥ ५ ॥

अन्येषु मर्त्यविषयेष्विव दुर्भराण्य-
घन्यानि सन्ति सुकृतैरविचुम्बितानि ।
कर्णाटकेष्वपि नृणां हृतजीवितानि
किं तत्र मुह्यसि मुधा प्रमदातिभारात् ॥ ६ ॥

नियतं कलेरविकलो महिमा बत दैवतेष्वपि बलात्क्रमते ।
गुणदोषयोर्हतविवेकबलः परिदृश्यते यदमरोऽपि भवान् ॥

नास्था पुण्ये न च नयगतौ नो परार्थप्रवृत्तौ
पाश्चात्यानामविनयपथैर्वञ्चितानाममीषाम् ।
निर्मर्यादाः निरवधिमदाः नित्यमश्रान्तलोभाः
धर्मांधर्मौ विदधत इमे क्रय्यविक्रय्यभूतौ ॥ ८ ॥

भाषावेषाचारभावानुभावे-
ष्वात्मीयत्वं किंचिदप्यस्ति नैषाम् ।
धन्यंमन्याः म्रात्यपाश्चात्यचर्यां
व्यामोहानां दासभूताश्चरन्ति ॥ १० ॥

अविद्यान्धाः विद्वद्भिरुदमदिराघूर्णितदृशः
दरिद्रान् भोक्तारो मनुजदनुजाश्चाप्यधिकृताः ।
बदीयां संपत्तिं सततमुपभुञ्जन्त्यनिकृताः
धिगेतान् कर्णाटान्, प्रमुदितमिह त्वामपि च धिक् ॥

प्रभुः प्रजानामवनेष्वसक्तः
प्रजाः विधिष्वात्महितेष्वसक्ताः ।
अन्ये पुनस्स्वोदर पूर्तिभक्ताः
जुगुप्सनीयेऽत्र किमादरेण ॥ ११ ॥

गद्यम्—तदसाम्प्रतमसाधुवस्तुदर्शनेन दिव्यं चक्षुर्दूषयितुम् । एहि परमपावनसुरतरङ्गिणीसलिलावगाहैः,

कल्पककुसुमामोदभरालसप्रशान्तपावनमन्दानिलासेवनैश्च प्रायश्चित्तं निर्वर्तयावोऽस्य पापस्येति पराङ्मुखीभूय विमानं प्रयाणाय नियोक्तुकाममशान्तचेतसं कृशानुं भुजे गृहीत्वा, पौरोभाग्यजनितगुणवैराग्याच्च तस्मै दयमानमनाः विश्रावसुरनाकुलमन्दस्मितमधुरवचनमेवमुवाच—

गुणदर्शनम्

दोषैकदर्शिता ते न शोच्यते; किंत्विदं तुदत्यस्मान् ।
संभावयस्यदोषे दोषं, यद्दोषयसि गुणं च सखे ॥ १२

गुणदोषसंकरविचित्रतया
जगदेव निर्मितमिदं विधिना ।
दिनमातपेन, तमसा च निशा
परिभूयते; किमु मुधाऽत्र रुषा ॥ १३ ॥

तेभ्यो नमोऽस्तु सुकुमारमनोगतिभ्यः
सद्वयस्समस्तजनजीवनसाधनेभ्यः ।
दिव्याऽपि सद्गुणलवेषु यदीयदृष्टि
रान्ध्यं बलाद्व्रजति दोषविचारणासु ॥ १४ ॥

असाधुमीत्याकुलितेन चेतसा
यस्साधुवस्तून्यपि नाभिनन्दति ।
विज्ञानभारेऽपि वृथैव जीवितं
स्यात्तस्य दुर्ज्ञेयलिपीव पुस्तकम् ॥ १५ ॥

नीहारैः केचिदन्धाः निरवधिसिकतानीरसाः केचिदन्ये
शुष्कास्तीव्रार्कतापैरनवरतगळद्धर्षमम्राश्च केचित् ।
देशाः क्षोण्यामयं तु प्रचुरगुणनिधिः पश्य सर्वर्तु सौम्यः
कर्णाटो ; हन्त चित्रा तव पुनरुभयत्रेयमद्वैतबुद्धिः ॥

सदाप्यम्भःपूर्णा सकलजगदातिथ्यनिपुणा
नदी कावेरीयं नवनवसुधासारमधुरा ।
भुजैरालिङ्गन्ती बहुतरसुखैर्लालयति यां-
स्त एते कर्णाटास्तव कथमुपालम्भविषयाः ॥ १७

ध्रुवं पाश्चात्यानामनुकृतिविधौ कश्चिदिह त-
द्गुणाभासैरेवापरिणतमतिस्तृप्यति जनः ।
अमी सर्वेप्यन्ये तदवितथविज्ञाननिपुणाः
दुरूहाभिः श्रीभिर्विदधति भुवं नाकतुलिताम् ॥

उपत्रिंशेषु वर्षेषु समृद्धिं पश्य निस्तुलाम् ।
साधितामत्र पाश्चात्यप्रतिभालंकृतैर्जनैः ॥ १९ ॥

पुरातनस्थितिः

असूर्यांशूद्भिन्नैः अपरिहतगाढान्धतमसैः,
शरारु प्रायत्वात्सकलजगदाकम्पनचणैः ।
महारण्यैः कीर्णो मनुजगतिशून्यैरनुपदं
पुरा कर्णाटोऽयं भवति बहुदुःखो जनपदः ॥

उपयोक्तुमक्षमतया निजश्रियं
बहुळं जनानवः देवमातृकान् ।
अभिवीक्ष्य शैलवनमध्यगाः पुरा
सरितो हसन्ति गळदूर्मिनिस्स्वनैः ॥ २१ ॥

बहुहेमभार भरितान्तराऽप्यभू-
दसुखप्रदा, सततशून्यदर्शना ।
वसुधाप्यसौ, धनवतोऽप्यरागिणः
कृपणस्य मर्तुरिव कामिनी, पुरा ॥ २२ ॥

प्रायः परप्रत्ययनेयबुद्धयः नवेषु सर्वेषु निरादराः प्रजाः ।
स्वगेहकुड्येषु चतुर्षु केवलं जगन्निलीनं सकलं च मेनिरे ॥

नासाभेदनपूतिगन्धनिचिताः नानारुजामाकराः
निश्शङ्कोद्गत वृश्चिकप्रतिभयाः, नित्योच्चलन्मक्षिकाः ।
वक्राविस्मृत दीर्घनिम्नविषमाः वीथ्यः प्रधानेष्वपि
स्थानीयेष्वभवन् पुरा वद पुनर्ग्रामावळेः का कथा ॥

अत्यन्तानतनीव्रवंशपटलैरन्योन्यसंघर्षि भिः
गेहैस्संकुचितान्तरासु नगरी वीथीषु पार्श्वद्वये ।
मुष्टिग्राह्यतमस्सु रात्रिषु वृथा तैलाशिनो दीपकान्
दृष्ट्वा चोरगणो विभाय नृपतेर्दण्डान्न तीव्रादपि ॥

विप्रेषु वेदाधिकृतेषु विद्याः प्रायो विवादैकफला बभूवुः ।
तथाऽपरेषां बत बुद्धितैक्ष्ण्यमकार्यमात्रे बहुळं व्यरंसीत् ॥

स्पृहिते स्वतन्त्रवृत्तिं पापं मत्वा प्रजाः पुराऽभूवन् ।
अज्ञातराज्यतन्त्राः अधिकारिमतानुरोधिसुखदुःखाः ॥

इदानींतनस्थितिः

अथ पश्य बहुळं व्यपाकृतं सर्वमेतदधुनातनैरिह ।
बालमानुकिरणैर्यथा मधौ पङ्कजद्युतिनिगूहनं हिमम् ॥

पुरा यत्रागम्ये निबिडतरगुल्मैरचकिता
निकुञ्जे व्याघ्राळिर्निशितनखैरः कृन्तति मृगान् ।
स एवायं देशो विपुलवरणोद्यानसुभगै-
रिदानीं प्रासादैर्नयनयुगमासेचयति नः ॥ २९ ॥

भूभृन्नितम्बतटमध्यमहापथेषु
निश्शङ्कमद्य बहुधा पथिकाश्चरन्तः ।
गोपायितेष्वपि महागहनेष्वधस्तात्
पश्यन्ति मत्तकरिणां विविधान् विहारान् ॥ ३०

ये गन्धसारतरवो भुजगैकभोग्य-
सौरभ्यसंपदतिशोच्यदशा बभूवुः ।
तेप्यद्य नागरकधामसु दारुमात्र-
संपादितानपि विधीनिह निर्वहन्ति ॥ ३१ ॥

धूमोच्छ्वासैः दुर्गमत्वं वनाना-
मुद्धून्वानाः बाष्पवाह्याश्शताक्षाः ।
दूरान् देशान् साधयन्तः क्षणार्धे
यान्तीदानीमायसैः नेमिमार्गैः ॥ ३२ ॥

अभेद्यैराधारैर्नियमितपरीवाहसुभगाः
स्रवन्तीः पश्येमाः यदुदकसुधासेचनबलात् ।
अपूर्वं माधुर्यं बहुळमिह सम्येषु कलयन्
पिपासाक्षुच्छून्यां मम समनुशोचाम्यमरताम् ॥

अमुं कृतकसागरं कलय कृष्णराजाङ्कितं
कवेरतनयापयोरभस गर्व सर्वंकषम् ।
असाध्यविधिसाधनेष्वपि निरङ्कुशां कौशलीं
मुदाहरति यस्सदा खलु नृणामिदानींतनीम् ॥

नीरन्ध्रप्रावबन्धै र्निचिततनुरसंभाव्य शैथिल्यगन्धै-
रेकायः कुड्यमूर्तिस्सफलयति दृशं दृश्यतां सेतुरेषः ।
खेलन्तीं दुर्निवारैरविदितगतिभिर्विभ्रमैरात्मपुत्री-
मेतां प्रेम्णा निरोद्धुं प्रहित इव महान् सह्यशैलस्य बाहुः॥

गळन्मुक्तामालाबलयकलिताः स्फाटिकशिला-
मयस्थूणाः स्थूलप्रगुणचतुरश्रा इव नवाः ।
पयोधाराः वेल्लत्पृषतशबलाः निर्गममुखैः
प्रसह्योद्धून्वन्त्यो गगनमिह भिन्दन्ति च महीम् ॥

पात्रान्तरेऽतिविपुलेऽपि बलादमान्ती
सेतूपरिद्रुतमहोद्धुरवारिधारा ।
वर्षासु नूनमियमेव कवेरकन्या
वाचामगोचररुचस्तनुते प्रपातान् ॥ ३७ ॥

इयं यन्त्रैस्तन्त्रैरनुपहतमन्त्रैश्च विजिता
विभक्ता कुल्याभिः परिचरति पल्लीजनमपि ।
अयं पाश्चात्यानामनवधिक वैदुष्यमहिमा
जडाऽप्येवं दासीभवति जगती येन हि नृणाम् ॥
अनितरवशैः प्रायो मेघैर्विदीर्णमनोरथाः
कृषिकनिचयाः यानत्याक्षुर्वृथाश्रमदुःखिताः ।
सपदि त इमे शून्या देशाः नितान्तमवन्ध्यतां
दधति परितस्सस्यश्यामास्तटाकजलाप्लवैः ॥
दिष्ट्या मही पुनरवग्रहशुष्कसस्या
नेतः परं भवति दुस्सहदर्शनाऽसौ ।
क्षुद्यातना विवशदीनमुखैरुदस्थि
त्वच्यात्रशेष सकलावयवैश्च लोकैः ॥ ४० ॥

विद्युच्छक्तिः

सफल्य दृशावत्र स्वैरप्रपात विनोदिनी
क्षणमिव तिरोभूयाधस्ताद्वने गहनान्तरे ।
पुनरपि समुद्भूता नूनेव काचिदियं नदी
वहति मधुरं मन्दं धीरं कवेरतनूभवा ॥ ४१ ॥
इह सरभसप्रोद्यद्धारा प्रपात दृढाहत-
प्रचलित महाचक्रैर्यन्त्रैरियं प्रतिपादिता ।

स्तनितकठिनैर्मेघध्वान्तैरदूषितनिस्तुल-
द्युतिरचपला विद्युद्धात्रीं तनोति दिवोऽधिकाम् ॥
तन्त्रीमुखप्रसरदद्भुत दिव्य शक्ति-
तेजस्तुरीयमिदमप्रतिमप्रभावम् ।
नात्यल्पमस्ति न च वाऽतिमहन्नराणा-
माकांक्षितेषु यदनेन न साध्यतेऽद्य ॥ ४३ ॥

गद्यम्—इयं खलु निरवद्या वैद्युतीशक्तिर्यत्किंचित्कील-संचालनमात्र पराधीनप्रभावा, निर्धूमविमलतया गृहिणी-गृहसकलावयव सौकुमार्यनैर्मल्य परित्राणकुशला वह्निज्वाल-भवति महानसेषु; अवर्तिकाशमूर्तिस्तैलस्रावदुर्वासित महीतला निवातनिरपेक्षा दीपलता गृहेषु; अनम्बुदाच्छा-दनविवशा निखिलनिशा निरन्तरोन्निद्रप्रभानिधिः कौमुदी वीथीषु, अनालस्यमन्दबुद्धिरज्ञातविश्रान्तिकौतुका सदा विधेया प्रधानपरिचारिका शिल्पशालासु; अशस्त्रधारा भीकरमूर्ति रतिक्तकटु नीरसौषध द्विगुणिताधिरगदंकारिणी चिकित्सालयेषु; संवाहिका परिश्रान्तानां, निर्णेजिका धूसर-वस्त्राणां, वीजनी निदाघतप्तानां, प्रसाधनी विलुलित सीमन्तानां, आकरस्सौख्यानामास्पदं भाग्यानां, निदान मानुकूल्यानां निकषोपलः कौशल्यानां; किंबहुना निधि-रद्भुतानाम् ॥

सुवर्णखनिः

प्रसारय दृशावितो बहुळनीलयन्त्रोद्गमैः
अकालनिचिताम्बुदा विजयते खनिर्यत्र हि ।
रसातलगता शिलातलनिगूढरूपाऽप्यसौ
बलात्समुपनीयते बत सुवर्णलक्ष्मीर्बहिः ॥ ४४ ॥

गद्यम् — इह खलु, युगान्तरानुभूत तदीयविविध बाधापराध प्रतीकारपरायणतया कलिविलासप्रसादितबलवैपरीत्येनेव मनुजलोकेन प्रतिदिनोन्मेष प्रतिभाविशेषवशात् प्रसह्य पराजितैः जीवग्राहं गृहीत्वा निजसेवायां नियोजितैरिव यक्षरक्षोभिर्दिवानिशमावर्तमानैरतिपृथुल विकट कराळनीलवक्त्रैरनेकैरायसैश्चक्रैरुचितेषु विद्युल्लता संस्पर्शमात्रेण चित्रमुद्भूतचेतनेष्विव निर्निरोधनिर्व्यूढविविधनिखिलतन्त्रेषु यन्त्रेषु वयोलिङ्गवैदुष्यानुरोधेनाधिकारनिमन्त्रिताः विविधवेषभाषाचारशबलाः साहसैकविनोदिनो जना इमे समेताः पश्य हाटकमयशिलोत्पाटनपाटवेष्वापाताळं निर्दयं निर्दळितहृदयायाः सर्वंसहायास्तलाद्दलादनुदिनसंपादितबहुळभर्मेष्टकचितां निर्मान्ति मनुजलोकसौख्यसोपानपदवीम् ।

अथ खनिः

अन्या पुनः खनिरसावचिरप्रवृत्ता
भद्रापगा तटमहीभृदुपत्यकायाम् ।

यत्रेदमाधुनिककौशलसिद्धिमूलं
कालायसं विपुलमुद्भ्रयते तथैव ॥ ४५ ॥

इत्युल्लसद्भूतिरयस्सुवर्णभारेण कर्णाटकदेश एषः ।
अपि प्रतीचीनजनस्य विज्ञानैश्वर्य गर्वं न चिराद्विनष्टि ॥

विद्याविषयः

यत्रेदृक्ष समृद्धिमूलममलं विज्ञानमाधीयते
शिष्येषु स्थिरसौहृदैरशमघनैर्निष्पक्षपातैर्बुधैः ।
पल्लीपत्तनबोर्यथार्हमभितस्संस्थापितान् संभृतान्
एतान् विद्वदधीक्षितानिह सखे वीक्षस्व विद्यालयान् ॥

अन्यासु पश्यतु भवानिह पाठशाला-
स्वद्यार्जयन्ति पुरुषैस्सममेव विद्याम् ।
एताः पुरा खलु महानसमात्रदृश्य
नैपुण्यनिष्फलतरप्रतिभास्तरुण्यः ॥ ४८ ॥

हतविधिवशाद्बाल्ये वैधव्यदुर्भरजीविताः
सततमदयं यातृश्वश्रूननान्दृभिरर्दिताः ।
इह तु सुखिताः कल्पाजीवाः विनीतधियः स्त्रियः
त्रिजगदधुना श्लोकैकार्तं चिराय न मन्यते ॥

कृषिकार्यश्रमशिथिलावयवोऽपि ग्राम्यलोक इह नक्तम् ।
विद्यालयेषु यत्नाद्विचिनोति ज्ञानशकलानि ॥ ५० ॥

वधिरान्धमूकनिचयोऽपि सादरं
परिपोषितो विपुलवेतनादिभिः ।
इह भात्ययं विविधशिल्पकौशलैः
विपरीतयन्निव विधिं विधेरपि ॥ ५१ ॥

ये स्वप्नेऽप्यनधीतशौचगतयो मैरेयदुर्वासिताः
स्वेच्छाचेष्टितभाषितैः कलुषिताश्चक्रुः पुरा वीथिकाः ।
पश्यैतानधुना विनीतवचनान् विद्यार्जनोत्साहिनः
सद्य स्पर्श सुवेष निर्मलतनूंश्चण्डालबालानिह ॥ ५२ ॥

अन्नपानपटवेतनदानैः पोषिताः प्रियहितैश्च वचोभिः ।
बोधिताश्चिरममीस्वहितार्थेष्वद्य जाग्रति जनक्रमबालाः ॥

विश्वविद्यालयः

पश्यायं महिशूरपत्तनमहाभूषायते व्यायत-
स्फायद्गोपुर सूचितस्वमहिमश्रीर्विश्वविद्यानिधिः ।
यत्र द्वित्र शरद्विनीतमतयो निर्यान्त्यपूर्वोन्मिषः
द्वैदग्ध्यास्तरुणास्त्रिवर्गपदवीनिर्वाहवैज्ञानिकाः ॥ ५४ ॥

कश्चिद्यौतिकमर्मशोधनरताः तत्त्वार्थजिज्ञासवः
केचित्केचन काव्यनाटककथासारस्य संसेविनः ।
कश्चिद्दुर्गहराज्यरक्षणरहस्योद्भेदनव्याकुलाः
कश्चिद्दुर्गमहागभीर गणिताम्भोराशि निर्मथिनः ॥

केचिद्विस्मृति मम्मपूर्वचरितोद्धारेषु बद्धव्रताः
केचिद्भीकरयन्त्रराक्षस वशीकारक्रियोपासिनः ।
केचिच्चित्रकलाविलास सततस्वाधीननेत्रोत्सवाः
छात्रा अत्र चरन्ति पश्य बहुधा विज्ञानभिक्षार्थिनः ॥

द्रव्यदाननियमाद्वियोजितो मासिकैः परिभृतश्च वेतनैः ।
अत्र निर्धनयुवा गतव्यथो न स्मरत्यपि निजां दरिद्रताम् ॥
विरुदैरभिनन्दनैस्सुवर्णाभरणैश्चापि बहूकृतास्त एते ।
स्वयमेव कृतिप्रियेण राज्ञा जगदेतत्प्रतिभाबलाज्जयन्ति ॥

सकलजगती जङ्घालांग्लेयवागुपबृंहिताः
चिरमचकिताः देशे देशे भ्रमन्त इमे जनाः ।
प्रियहिततरास्तत्तद्वर्गत्रयार्जनपद्धतीः
निपुणमतयो ज्ञात्वा ताभिस्स्वदेशमुपासते ॥

यत्रैते निवसन्ति पश्यतु भवानेतान् गृहान् निष्कुट-
प्राकारोपरि किञ्चिदुद्गतलता लावण्यचेतोहरान् ।
निष्प्रत्यूहगतागतप्रियमरुत्तेजो मुहुर्लोलितैः
आकीर्णानमितो गवाक्षनिवहैर्नानाविचित्राकृतीन् ॥

नगरवर्णना

ऋज्वायतेः कमठपृष्ठनिभैरधस्तात्
नाळप्रवाहि मलिनाम्बु विशुद्धवाह्यैः ।
मार्गैरुपारचितमञ्जुलरङ्गवल्ली
रेताः प्रपश्यनगरीस्सुविभक्तरूपाः ॥ ६१ ॥

चतुष्पथ स्तम्भविलम्बि वैद्युत
प्रदीपिका गोळक गुच्छपिच्छिलाः ।
समप्ररूढोभयपार्श्वपादपाः
विभान्ति वीथ्यः षटचित्रिता इव ॥ ६२ ॥

क्षुरिकाकृत्तविचित्रमूर्तिसुभगैर्गुल्मैर्महाव्यायतैः
तरुभिः दीव्यदनेकवर्णललितैः कुब्जैर्घनैश्च द्रुमैः ।
सरसामोदलता वितानवलितैः कुञ्जैश्च सज्जासनैः
भरितानत्र विलोकयाद्य नगरारामान् मनोमोहनान् ॥

कुसुमसुरभिज्योत्स्नालेप प्रलोभिषु शाद्वले-
ष्विह परिगतान् पौरान् राकानिशासु कुशीलवाः ।
समलक्ष्यगतैर्वीणा वंशीमृदङ्गमुखोद्गतैः
अमृततुलितैर्गीतैः कुर्वन्त्यमून् सफलश्रुतीन् ॥ ६४ ॥

कासारसंचित विशोधन निर्मलाति
स्वादूदभारभरितैरिह लोहनाळैः ।
एता नगर्य इह जाग्रति निर्विशेष
निम्नोन्नतैर्निरवकाशरुजा निदानाः ॥ ६५ ॥

चिकित्सयः

नानाजन्तुकवोष्णकण्ठरुधिरस्रावैरसह्यैः पुरा
रोगार्तिप्रशमाय यामरजनै मौर्ख्यादुपास्यन्त याः ।
ताः पापैकफलाः प्रजाभिरधुना विज्ञानमन्त्राक्षरैः
उच्चाट्यन्त इमाः पुरी परिसरान्मारीमुखाः देवताः ॥

प्रत्यङ्गसंभाव्यरुजा प्रतिक्रिया
प्रकारभेदेषु विशिष्टकौशलैः ।
स्वाधीनशस्त्रैर्गरळेष्वपीश्वरैः
भिषग्वरैः स्मेरमुखैर्निषेविताः ॥

अजस्रसज्जीकृतसर्वसाधनाः
कदापि रोगार्ततया दुर्गमाः ।
इमे चिकित्सानिलयाः पुरे पुरे
पुष्यन्ति नीरोगदृढां जनश्रियम् ॥ ६८ ॥

मृदुधवळोपधानशयनोन्नतमञ्चगतान्
उपचरितान् वधूभिरतिकोमलवाग्भिरिह ।
मधुरहितान्नपानमुदितान् गदितान् कलयन्
रुजममिकांक्षति स्वयमरोगदृढोऽपि जनः ॥

ग्रन्थालयैर्बहुविधैस्सुलभैश्च वार्ता-
पत्रैः पुरेष्विह जनाः बहुधा विनीताः :
अन्योन्यसाह्यविधिसाधित सर्वकार्याः
स्वल्पश्रमैर्बहुफलाः कलयन्ति वृत्तीः ।

राज्यभारः

अविदितलोभमत्सरगुणैर्नयमार्गचणैः
प्रतिनिधिभिः प्रजानियमितैरभिसंवलितः ।
अधिकृतसन्ततेरिह निरङ्कुशदुस्सहतां
कथयति पश्य शासनविधानसभाविभवः ॥

मन्येवं बहुविभवाः गण्यन्ते कथममी मिताङ्गुलिभिः ।
गौरोभाग्यान्धानां भवादृशां केवलं सुदुर्दशाः ॥
प्रभुं प्रजानामवनेष्वसक्तं भवान् पुरा प्राह विवेकदूरः ।
एवं श्रियो निस्तुलनृत्तहेतुं जानीहि तं ब्रह्मादिमसूत्रधारम् ॥

अयं खलु कुलक्रमागतमपि प्रजास्वात्मनः
प्रभुत्वमनिवारितं शिथिलयत्युदाराशयः ।
सदास्वहितसाधनेष्वलमनन्यतन्त्रान् जनान्
विधातुमनसि प्रभौ कथमसक्तिसंभावना ॥

पित्रा चाममहीमहेन्द्रमणिना संरोपितं दोहदैः
यं माता विविधैः पुपोष सुचिरं वाणीविलासेश्वरी ।
साम्राज्याभ्युदयद्रुमोऽयमधुना श्रीकृष्णभूपादरैः
प्रच्छायः फलितः करोति जगतामातिथ्यमन्यादृशम् ॥

सर्वस्व ग्रहणेष्यवारितगतिः द्रव्येषु राज्यार्जिते-
ष्वेष द्वादशमेव तत्र नृपतिर्भागं निजं मन्यते ।
तं चायं विनियोजयत्यविरतं लोकार्थमेव प्रभुः
विद्वन्माननदीनरक्षणमुखव्यापारबद्धादरः ॥

परार्थानात्मार्थैस्तिरयति नृपः कश्चिदपरः
परार्थव्याजेन प्रथयति निजार्थान् निपुणधीः ।
परार्थैरात्मार्थान् शिथिलयति योऽश्रान्तममुना
धरा धन्या मन्ये नियतमिह कृष्णक्षितिभुजा ॥

संस्कृवविद्याः

पवित्रवृत्तिः परिपूतमानसः तपोधनस्सत्यवचो निधिर्वशी ।
अयं हि पाश्चात्त्यगुणेषु सादरः प्राच्येषु धर्मेषु विशिष्य मोदते
यदाश्रयेणैव हि दक्षिणापथे श्रुतिस्मृतिज्ञानमयी प्रदीपिका ।
जागर्ति, तं पश्य सखे सरस्वती प्रासादमेतेन चिरात्सुपोषितम्

सरसमनोज्ञकाव्यरचनाचतुरैः कविभिः
निरवधि शास्त्रवारिनिधिनिर्मथनैश्च बुधैः ।
उपचरिता चिरादिह शुभाशिषमग्र्यफलां
कलयति भारती सततमत्र महीशमणौ ॥ ८० ॥

वीणावेणुमृदङ्गमुख्यरसिकैर्नादामृतोपासकैः
यस्यौदार्यकथादिगन्तरगता सर्वत्र सङ्गीयते ।
सोऽयं गीतकलानिधिर्विजयतामस्मद्विशेषप्रियः
श्रीमान् कृष्णाविभुर्महीसुरपुरी साम्राज्यसिंहासने ॥

इति बहुविधैस्साक्षाद्विश्वावसुः प्रतिबोधितैः
शिथिलितमहासूयं प्रायः कृशानुमपि व्यधात् ।
अथ च कुतुकात्पश्यन्तौ तौ चिराद्ययतुर्दिवं
सुरपरिबृढायैतां स्फीतिं निवेदयितुं भुवः ॥

कृतिरिति सुप्रथितशिलापुराभिजनकृष्णसूरितनुजनुषा ।
इह महिशूराभ्युदयादर्शो निरमाय्यनन्तकृष्णेन ॥

इति श्री महिशूरमहास्थानीविदुषा राळपल्लि अनन्त-
कृष्णशर्मणा प्रणीतः महिशूरराज्याभ्युदयादर्शः
लघुचम्पूप्रबन्धः

श्रीगीतगोविन्दे पाठपरीक्षणम्*

ॐ तत्सत । नमस्सदसे । नमस्सदसस्पतये ।

महाशया: । सहृदया: ।

जयदेवकृतौ गीतगोविन्दामृतसागरे ।
परीक्षे पञ्चषान् बिन्दून् गानवैशद्यलोभत: ॥

तत्र किञ्चिदादौ प्रस्तूयते । पाठ्ये गेये च मधुरतया श्रीमद्रामायणरचनां निरूढवान् भगवानादिकविर्वाल्मीकि: । मधुरगुणेन कोमलतां कान्तिं च संयोज्य सन्दर्भशुद्धं पदावलीं प्रथनीयेति जयदेवपण्डितकवे: सङ्कल्प: । स च सर्वथा सिद्धार्थोऽभूद्गीतगोविन्द इति निश्चप्रचम् । ते च माधुर्य कोमलताकान्तयस्त्रयो गुणा: काव्येऽस्मिन् शब्दार्थो-भयगता इति केषाञ्चिद्व्याख्यातॄणामाशय: । किन्तु, मन्ये, शब्दरचनायामेव ते भूयिष्ठमवभासन्ते । युक्तं चैतत् । गीतगोविन्दं खलु विशिष्य गेयं काव्यम् । सन्ति परं गतं पद्यानि श्रुतिसुखान्यत्र । तेषु, चतुर्विंशतिगेय प्रबन्धेषु च श्रीराधामाधवविषयिणी कवेर्गभीरा भक्तिभावना, विप्रलम्भसंयोगशृङ्गारभावनारूपेण परिणता, बहुधा समुल्लासिता च कविना । आधिभौतिका आध्यात्मिकाश्च

---

* Lecture delivered on *Jayadeva Day* celebrated under the auspices of the Madras Samskrit Academy on 19-2-55.

ते ते जगद्विजयिनो भावाः सहृदयहृदयसर्वङ्कषतया परिस्पन्दिताश्चानेन सुमनसा जयदेवेन। किन्तु राग-ताल-लय-निबद्धास्ते चतुर्विंशतिः प्रबन्धा एव जयदेवकवेरुपज्ञारथं नियम्य समचालयन्निति विनापि सूक्ष्मेक्षिकाम् अवगम्यत एव। आपादचूडमपि तेषु गेयेषु लयानुबन्धिनी तालव्यदन्त्यवर्णप्राया, अन्तरान्तरा परसवर्णैरनुस्वारैश्चार्द्रीकृता, असंयुक्तवर्णमयी अनुस्यूतानुद्वेजकसमासविलासा, यतिस्थानसुविश्रान्तपदवाक्यरुचिरा अनन्यसाधारणी शय्या प्रथमास्वाद एव कस्य रसिकस्य श्रवणपथे न निषिञ्चति सुधाम्! न चेदृशी रीतिर्गीतगोविन्दगतपद्यसन्दर्भेषु कविना सप्रयत्नं निवेशिता इत्यपि सुग्रहमेव।

'यमुना तीर-वानीर निकुञ्जे मन्दमास्थितम्।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी॥'

इति पद्यं पठित्वा अनुपदमेव—

'निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरम्।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्॥

इति पदमपि गायन् को नाम सहृदयः उभयोर्बन्धतारतम्यं न जानीयात्? अतो गीतगोविन्दगताः सन्दर्भगुणा विशिष्य शाब्दाः; अतश्च गानानुभाव्याः। तदनन्तरमेव यथारुचि यथाधिकारञ्च गायकाः श्रोतारश्च तद्गतान् अर्थभावविशेषान् आस्वादयन्तीत्यन्यदेतत्। मम बाल्ये कौमारे च वयसि,

संस्कृतभाषायां सर्वथा अशिक्षिता अपि अनेका ग्रामीणा मुखादितरेतरान्योऽन्याश्च गीतगोविन्दप्रबन्धान् समग्रमनुसन्दधानाः कमप्यानन्दमनुबभूवुः, अनुभावयाञ्चक्रुरिति च मदीया स्मृतिरद्यापि न मलिनायते ।

गीतगोविन्दस्य जयदेवोपज्ञं गानक्रमश्च बहोः कालात्पूर्वमेव केनापि हेतुना उत्सन्नो बभूवेति हन्त चिन्तेयं मुष्परिहरैव । जयदेवादनन्तरं द्विशतवत्सरेष्वसमाप्तेष्वेव समुत्पन्नः कुम्भकर्णभूपतिः गीतगोविन्दं व्याख्यास्यन्नेवमाह –

प्रत्यक्षायि प्रबन्धो यो जयदेवेन धीमता ।
न तस्य विद्यते लक्ष्म सर्वाङ्गैरुपलक्षितम् ॥
(प. १५) इति ।

अतश्च,

गीते जयदेवकृते धातुं कुम्भो नृपस्तनुते–(२०)
स्वर-पाट-तेनकानां करोति गुम्फं सुमानार्थम्–(२१)
इति च ।

किन्तु चित्रमिदं यत्कुम्भभूपतेर्मुद्रितायां टीकायां तेन गुम्फितानां स्वर-पाट-तेनकानां गन्धोऽपि न गोचरीभवति । नृत्यमात्रोपयोगिनः पाठास्तेनकाश्च तिरोभवन्तु नाम । गानमात्रालुब्धानां मादृशां न किञ्चित्तावता छिद्यते । यदि गेयानां स्वरक्रमः प्राचीनो व्याख्यात्रा सम्पादितः, स्वयं कल्पितो वा लभ्येत, तर्हि धन्या भवेम वयम् । किञ्च

कुम्भभूपतिना निर्दिष्टाः रागास्तालाश्च अभिनवतया तेन स्थापिता एव, न त्वनूचाना इत्युत्प्रेक्षणीयमस्ति, यतस्ते मूलग्रन्थनिर्दिष्टेभ्यो रागतालेभ्यः सर्वथा विभिन्ना एव टीकायां दृश्यन्ते। अन्यच्च, स्वयमुद्दिष्टानामपि रागतालानां लक्षणं दिग्दर्शकतयापि नानुगृहीतं तेन। अतः खलु सन्दिह्यते यत्कुम्भकर्णस्य समग्रा व्याख्या नैवोपलब्धा; उपलब्धा वा केनापि हेतुना समग्रं न मुद्रिता इति। इममेव मार्गमनुरुन्धाना अन्येऽपि मया परिचिताः टीकाकृतो गीतगोविन्दशब्दरचनामन्यथान्यथा सविस्तरं विवृण्वान अपि तन्नादशरीरनिर्वचने सर्वथैवोदासत इति चित्रीयते चेतः! क्वचिदपि तैरुल्लिखिता रागलक्षणश्लोकाश्च आरोहावरोहाभ्यासलङ्घनादिकं रागस्वरूपं सर्वमपहाय, तत्पत्नीः पुत्रान् वाहनानि वस्त्रभूषणानि, विलासान् विभ्रमांश्च विवृण्वानाश्चित्तमुद्वेजयन्ति, विनोदयन्ति वा) एवं च गीतगोविन्दप्रबन्धरागप्रकारो बहोः कालात् प्रतिदेशं प्रतिग्रामं प्रतिव्यक्ति च यथायथं विभिन्न एव प्रचलतीति नायं विस्मयनीयो विषयः।

इयमेव दशा तालानामपि। किन्तु निबद्धेषु प्रबन्धेषु यथा रागाणां विपर्यासः सुकरः न तथा तालानामिति सुविदितमेतत्, यतो रागो गायकाधीनः; तालस्तु प्रायशः प्रबन्धस्य वर्णविन्याससरणिमनुबध्नाति। अतश्च यत्किञ्चिद्गीतं

येन केनापि रागेण संयोज्य सञ्चारयितुं शिक्षितगान्धर्वाः सर्वेऽपि शक्नुवन्ति। तालं पुनर्विभेत्तुम्, कालमानस्य वैविध्येन, क्रियाणां च विभिन्नतया गीताक्षराणि संगृह्य, विस्तीर्य, निगीर्य प्रयोक्तव्यानि भवन्ति। अथापि तत्राप्यस्त्येव कश्चिदाकुलीकरणस्यावकाशः। अत एव जयदेवप्रबन्धास्तत्र तत्र विभिन्नैस्तालैर्निबध्य गीयन्ते। पुराप्यगीयन्त। यतो मुद्रिते मूलग्रन्थ एव विस्पष्टचतुरश्रगतिकस्य 'रासे हरिमिह विहितविलासम्' इति गीतस्य, सुग्रहमिश्रगतिकस्य 'मामियं चलिता विलोक्य वृतं वधूनिचयेन' इति गीतस्य च 'यतितालेन गीयते' इत्येव निर्देशो दृश्यते! व्याख्यातारोऽपि भिन्नानेव तालान् स्वच्छन्दमुद्गिरन्तीत्यपि पुनरुक्तिरेव। यतोऽत्र 'रासे हरिम्' इति गीतस्य वर्णयति ताल इति कुम्भः, प्रतिमठताल इति शङ्करमिश्रः, रूपकताल इति लक्ष्मीधरश्च निरदिशन्। प्राचीनैर्बहुधा प्रस्तीर्य लक्षिताननन्तान् मार्गदेशीयतालान् सप्रश्रयमेवोदास्य, षञ्चशतवत्सरेभ्यः प्रागेव केचन विवेकिनो वाग्गेयकाराः सप्त 'सूळा'दितालान् ध्रुवमठ्यादिसंज्ञकान् आदितालमष्टमञ्च प्रचारयन्ति स्म। तत्रापि शालीनबुद्धयो वयमद्यतना आदि–रूपक–त्रिपुट–झम्पामिश्रचतुर्भिरेव तालैर्गीतक्रियां भूयशो निर्वहन्तो वर्तामहे। किञ्चातः परमपि सौलभ्यलुब्धाः सशब्दक्रियामात्ररूपैः 'चापु'तालैः गीतानि वाहयामः। अतश्च

अद्य गीतगोविन्दप्रबन्धानां रागतालचर्चया न किमपि साधनीयमुत्पश्यामि। परन्तु यथानुकूल्यं यथारुचि च रागांस्तालांश्च नियोजयतामपि गायकानामस्ति कश्चन नियामको निबन्धमूलद्रव्यभूतो लय इति न विस्मर्तुं शक्यते। लयश्च कालखण्डानां तालेषु परस्परमन्यूनाधिकं साम्यम्। स च चतुरश्र त्र्यश्र-मिश्र-खण्ड-सङ्कीर्णभेदैः पञ्चविधः प्रचलतीति सुविदितमेव। तत्र गीतगोविन्दे चतुरश्र-मिश्र-खण्डा एव गतयः प्राधान्येन प्रपञ्चिताः स्फुरन्ति। त्र्यश्रा सङ्कीर्णा च गतिर्न कुत्रापि साक्षान्निवेशितेत्यपि सुग्रहमेव। इमे च त्रयो गतिभेदाः, अस्पष्टा अपि ध्रुवपदेषु, प्रबन्धखण्डभूतेषु पदेषु नियतमात्रामापकैर्गुरुभिर्लघुभिरक्षरैर्[illegible]त्र प्रकटीक्रियन्ते। केवलमेकस्मिन् 'वहति मलयसमीरे' इत्यादिके दशमे प्रबन्धे गतिर्गुप्ता दुरूहा दृश्यते। तत्र खलु पञ्चस्वपि षदेषु प्रत्येकं चत्वारि खण्डानि। प्रथमे मात्राः एकादश; द्वितीये नव; तृतीये दश; तुरीये पुनरेकादश। प्रतिखण्डमयमीदृश एव गुरुलघुनिवेशः श्रुतिगोचरीभवन् विस्मापयति। अस्मिंश्च मात्राणामीदृशे नियते विषम निवेशे कीदृशीं गतिमनुरुध्य गीतं निर्वाह्यमित्यत्र न मे मितंपचा धीः प्रसरति। आनन्दभैरवीरागे आदितालेन निबध्य कैश्चिद्गीयमानमिदं जाने। किन्तु तत्र गीताक्षराणां वैरूप्यमेव भूयशः श्रवणकुहरं भिनत्ति। अन्येषु

सर्वेषु प्रबन्धेषु गुरु–लघु–विन्यासपरीक्षया लयगतिः सुग्रहा भवतीति निश्चेतुं शक्यते ।

लघुरेकमात्रकः, गुरुर्द्विमात्रक इति खलु पद्यच्छन्दोविदां नियतः सम्प्रदायः । गीतच्छन्दोगानां तु मते लघुगुरुवर्णयोर्नियतमात्रान्यूनतैव दोषाय; न तु मात्राधिक्यम् । तच्च प्रत्युत गुण एव भवतीति विश्रुतमिदं वाग्गेयकारसम्प्रदाये । अयञ्च जयदेवकवेरसाधारणो रचनाचातुरीविलासः यदयं लघुगुरुवर्णानां मात्रानियममिमं न कुत्राप्याकुलयति । केवलं पादावसाने खण्डान्ते वा गानसौकर्यकाङ्क्षया अक्षरमात्रामानं दीर्घयति । तच्च खलु वृत्तच्छन्दोविदामप्यनुमतमेव । !पादान्तस्थो लघुर्विकल्पेन गुरुर्भवतीत्यनुजानानास्ते पद्यानां गीताभासतामेव सूचयन्तीत्यास्तां तावत् ।

एवमक्षराणां गौरवलाघवविन्याससूचितया दिशा लयगतिमुत्प्रेक्ष्य गीतगोविन्दप्रबन्धान् गातुकामानां तत्र तत्र मुद्रिताः व्याख्यातृभिरङ्गीकृताश्च कतिचन पाठाः कण्ठेगड्डूयन्ते । तथा हि—

१. प्रथमप्रबन्धे प्रतिपदमपि अर्धान्तयोः 'वेदं-खेदं, पृष्ठे रिष्ठे, लम्मा–मम्मा' इत्यादिविधया गुरुद्वन्द्वं दशसु पदेषु निवेशितं नियमेन दृश्यते । किन्तु पञ्चमे पदे—

'छलयसि विक्रमणे–बलिमद्भुतवामन ।
पदनखनीरजनितजनपावन'—

इति भगणो निवेशितः। स च गानपरिपाटीमाकुलयति। विशिष्य प्रथमार्धे 'बलिमद्भुतं वा....'इति चतुरश्रगणद्वयानन्तरम् 'मन' इति लघुद्वयेऽन्तिमस्य दीर्घीकरणायावश्यकं गणद्वयान्तरपूरणाय। तदा प्रथमो लघुरनाश्रयः सन् कष्टकायते। कथमपि तालं लयञ्च निरुद्ध गायकैर्गातुं शक्यत इत्यन्यदेतत्। अक्षराणां सामानाधिकरण्यभङ्गोऽत्र नियतमनुभूयत एव। सर्वत्रान्यत्र गुरुद्वयं नियमेन निबद्धवतो जयदेवकवेः अत्रैकत्र प्रतिभा पङ्गूबभूवेति तु न विमर्शसहम्। किञ्च 'केशव धृतवामनरूप-जय जगदीश हरे' इति ध्रुवपदे यथापुरमवतारविशेषं निर्देक्ष्यतः कवेः, पूर्वमेव 'अद्भुतवामन इति पुनर्वक्तव्ये का सङ्गतिः? अद्भुतवामनेति विशेषणविशेष्ययोः समासोऽपि सत्यं नासाधुः-किन्तु शूरराम:, सुन्दरकृष्णः इतिवत् अरुन्तुदः सहृदयानामसाम्प्रदायिकतया। अतोऽत्र 'अद्भुतजवन' 'जनपवन'—इति वा, ईदृशो वा कश्चन पाठभेदः स्यादित्युत्प्रेक्षे।

२. 'कथितसमयेऽपि हरिरहह नय यौवनम्' इत्यादिके त्रयोदशे प्रबन्धे सप्तमपदे,

'अहमिह निवसामि नगणितवनवेतसा'

इति पाठः कुम्भकर्ण—शङ्करमिश्राभ्यामङ्गीकृतो विवृतश्च दृश्यते। पञ्चमात्राकैर्गणैर्गुम्भितेऽस्मिन् प्रबन्धे पदखण्डमिदं 'अहमिह निवसामि न—गणितवनवेतसा' इति

विभक्तव्यं भवति। तदा मात्रामानस्य परं कुशलमेव। किन्तु 'वसामि न' इति जगणपूर्विका गतिः मात्राच्छन्दस्सु न साधारणी। यत आदिलघुर्यगणो मध्यगुरुर्जगणश्च गतिलयमपथे प्रवर्तयतः। आदिममेकं लघुं समनन्तरवर्ती गुरुः स्वप्राबल्येन दुर्बलयति, ततश्च गणस्वरूपं भिद्यते इत्यनुभवगम्योऽयं पन्थाः। किन्तु अद्यावधि अमुद्रितायां 'श्रुतिरञ्जनी'— टीकायां लक्ष्मीधरसूरिः— 'अहमिह वि–निवसामि–नविगँणित वेतसा' इति पाठमाहृतवान्। स च उचिततर इति मन्ये।

३. 'स्मरसमरोचितविरचितवेषा' इत्यादिकस्य चतुर्देशगीतस्य ध्रुवपदे—

'कापि मधुरिपुणा–विलसति युवतिरधिकगुणा'— इति पाठो मुद्रितः। 'सह विलसति युवतिः' इति कुम्भकर्णगृहीतः पाठः। शङ्करमिश्रेण लक्ष्मीधरेण च सहशब्दो न गृहीतः। सर्वत्रास्खलितचतुरश्रगतिनिबद्धं गीतमिदम्। तत्र 'कापि मधुरिपुणा' इत्ययं पूर्वो ध्रुवपदखण्डः, 'विलसति युवतिरधिकगुणा' इत्ययं तूत्तरः खण्ड इत्यन्तिमो 'णा'कारप्रासः स्फुटयति! उत्तरखण्डान्तिमणावर्णस्य चतुर्मात्राकं गुरुत्वमिति, तत्पूर्वा द्वादशमात्राकास्त्रयश्चतुरश्रगणा इति च गीतरचनास्वाभाव्येन स्फुरत्येव। किन्तु सहशब्दघटिते उत्तरखण्डे 'सह

विलसति युवतिरधिकगु....' इति त्रयोदशमात्राः, तद्विघटिते 'विलसति युवतिरधिकगु....' इत्येकादश मात्रा भवन्ति। तदा षोडशमात्राकस्य खण्डस्य लयनिर्वाहाय णाकारः पञ्च-मात्रावान् त्रिमात्रावान्वा कर्तव्य इति सर्वथा व्यधिकरणेयं पाठगतिः। अज्ञातकर्तृके अमुद्रिते कस्मिंश्चिदान्ध्रव्याख्याने* व्याख्याता 'विलसति युवतीरधिकगुणा' इति पाठं संस्कृतवान्, प्रायः 'अपि माषं मषं कुर्यात्' इत्याभाणकं शरणयन्। किन्तु, अत्र 'सह लसति युवतिरधिकगुणा' इति पाठः संस्कारमर्हति। लसति, विलसतीत्यनयोः ईषत्करोऽर्थभेदः।

४. अथैकोनविंशे 'वदसि यदि किञ्चिदपि' इति गीते खण्डलयनिबद्धे ध्रुवपदमेवं मुद्रितम्—

'प्रिये चारुशीले मुञ्च मयि माननिदानम्—' इति। पूर्वप्रतिपादितरीत्या 'प्रिये चा....' इति आदिलघोर्यं-गणस्य नान्यत्र कुत्रापि गणादौ निवेशो जयदेवेन कृतः। 'प्रिये' पदमेव प्रथमं व्याख्येयतया गृहीतवन्तौ शङ्करः कुम्भश्च। लक्ष्मीधरस्तु 'प्रिये—अचारुशीले' इत्यपि विभजन् इममेव पदानुक्रमं स्पष्टमभिमनुते। आन्ध्र-टीकाकृदेकः 'चारुशीले प्रिये' इति पठति। किञ्च

---

*कोशोऽयं श्रीवेङ्कटेश्वरप्राच्यपरिशोधनालयग्रन्थभण्डागारे (तिरुप्पदि) वर्तते।

'चारुशीले प्रिये चारुशीले' इतिद्विरावर्त्य गतिगणसंख्या-मपि चतुरश्रयन् गायकान् समादधाति ।

५. किञ्च । अस्यामेवाष्टप्द्यां षष्ठे पदे—

'भण मसृणवाणि कक्षाणि चरणद्वयम्
सरसलसदलक्तकरागम्'—

इत्यत्र 'दलक्तक' इत्यस्थानप्रविष्टोजगणः श्रवणमुद्वेजयति। अयं कुम्भनृपालेन स्वीकृतो व्याहृतश्च पाठः । शङ्करश्च तमेवानुबध्नाति । लक्ष्मीधरस्तु 'सरससदलक्तकसरागं' इति रुचिरं पठन् व्याचकार। आन्ध्रटीकाकारस्तु 'सरसदालक्तकसरागं' इति पठन् 'सरसत्—आलक्तक' इति विभज्य विवृतवान् । लक्ष्मीधरपाठः साधीयानिति सुव्यक्तमेव ।

६. एवमष्टम्याम् 'रजनिजपितगुरुजागरराग' इत्यादिकायाम् अष्टपद्यां चतुर्थे पदे—

'चरणकमलगलदलक्तकसिक्तमेदं तव हृदयमुदारम्' इत्येव कुम्भशङ्करलक्ष्मीधरास्त्रयोऽपि पेठुः । चतुरश्रगतिभरितेऽत्र प्रबन्धे मध्यमकस्मादेव प्रविष्टो 'दलक्तक' इति लघुमात्रको गणो जगणादिश्च श्रवणरुजमुत्तेजयति । तत्र लकारस्य संयुक्तपूर्वस्यापि लघूच्चारणेन निर्वाहस्तु अगतिकायां गतिः । अत्रापि आन्ध्रटीका 'चरणकमलगतलक्तकसिक्तम्' इति पठित्वा परां स्यौचितीमाविर्भावयति ।

अलक्तकवाची लक्तकशब्दोऽप्यस्तीति आधुनिकाः विल्सन्, विलियम्स्प्रभृतयोः नैघण्टुका अभिप्रयन्ति। परन्तु प्राचीनेषु अभिधानकोशेषु अद्य यावन्न कुत्रापि लक्तक-शब्दो मया लक्षितः। नाप्यन्यैः कविभिः प्रयुक्तः परिचितः इति किञ्चिदिव सङ्कुचति मनः।

७. एवमन्तिमे अष्टपदिप्रबन्धे षष्ठे पदे—

'मम रुचिरे चिकुरे कुरु मानद मनसिजध्वजचामरे'

इत्येव व्याख्यातृत्रयानुगृहीतो व्याकृतश्च पाठः। स त्वेकया मात्रया न्यून इति श्रवणमात्रेण प्रतीयते। इहापि, मानसजध्वजचामरे' इति पाठमुद्भावयन् आन्ध्रटीकाकृत् गायकसहृदयानामभिनन्दनमर्हति॥

अनयैव दिशा परीक्ष्य निर्णेयाः सन्त्यन्येऽपि त्रिचतुरा उद्देशाः। किन्तु अतिविस्तराद्बिभेमि। गीतगोविन्द-पाठौचितीपरीक्षायां जयदेवपदावल्याः सार्वभौमी लय-वैशद्यसम्पत्तिरपि परमुपकरोतीति विजिज्ञापयिषुः तत्र-भवतामेतावन्तं कालं व्यनोदयम्। परमनुगृहीतो धन्य-श्चास्मि तत्रभवताम् इयता सदयावधानेन॥

प्राप्तः सन्त्यज मन्दिरं श्रय घनोन्मत्तानवज्ञाशतं
मौनेनापि सहस्व शोषय तनुं सेवासु वा मा शुचः ।
उत्तानद्वयमुच्चकैरुपहसन् लम्बालकः केवलं
मायं त्वामभिगच्छतु प्रियमतीकक्षावलम्बी शिशुः ॥

तोलाबध्ये शिशुमभिनवैर्हासलेशैर्विलासान्
अभ्यस्यन्तीमविकलदृशा पश्यतोः सूतिगेहे ।
पित्रोर्मोदं प्रसति सहसाभ्युद्गता प्राक् परासु-
ज्येष्ठापत्यस्मृतिजनितशुक् निष्प्रतीकारतीव्राः ॥

तत्तन्मुकुलैर्द्वित्रैर्नूतनोद्गमात्प्रियदंशनैः
अर्पादि शिशुना माता दष्टस्तनी कृतसीत्कृतिः ।
किमिति सहसा पृष्टा पत्या न किञ्चिदितीक्षणे
नमयति मनागोष्ठोपान्तस्खलन्मधुरस्मिता ॥

निषिद्धान्येवासौ परिमृशति वस्तूनि न च तै-
रभीः सन्तुष्यत्यथ हसति तर्जासु बहुलम् ।
कथं निर्वोढव्यो गृहविधिरनेनेति विवशा
धात्री पत्नीं पश्यन्विकसितमुखो नन्दति पिता ॥

अन्तः पञ्जरवर्तिनश्शुकशिशोरालापनैर्मोदितो
वेगात् क्रीडनकानि गेहपुरतो विक्रेतुकामो वणिक् ।
अक्लिष्टा गृहरक्षवल्लिमविपर्यस्तं च वस्तुक्रमं
पश्यन्नेव बहिर्नलिन्दनिहितां पेटीं पुनः प्रस्थितः ॥

मङ्गलाशीर्वादपत्रिका

स्वस्ति श्रीमन् लिङ्गराजेन्द्र सैयं
विश्रान्तिस्ते राजकीयान्नियोगात् ।
भूयाच्छान्तिस्फीतचित्तप्रसादा
निष्प्रत्यूहं तन्वती दीर्घमायुः ॥

जननात्प्रभुरसि मननात्
कविः किमाशास्महे वयं तेऽन्यत् ।
बाह्यं चान्तरमपि च
स्वाधीनं तव हि भवति सुखबीजम् ॥

कर्षन्त्येके पण्यवीथ्यां प्रलुब्धाः
युञ्जन्त्यन्ये दुर्दरिद्राः श्ववृत्तौ ।
काव्यात्मानं केवलं स्वात्मतृप्त्यै
देवीमश्नन् त्वादृशः कोऽपि धन्यः ॥

प्रशान्तिः स्वच्छन्दा मतिरनुपरुद्धश्च समयः
कविं कुर्वन्त्येते विविधनवनिर्माणनिपुणम् ।
अयं भावो मन्ये सुचिरमुपधाशुद्धचरिते
नियोगाद्विश्रान्तिं त्वयि वितरतः कृष्णनृपतेः ॥

पूजां सख्यं साह्यमर्थं च सूरि-
ष्वाधाय त्वं स्वाधिकारे कृतार्थः ।
आशीर्वादे चास्मदीयोऽधिकारः
सिद्धार्थोऽस्तु श्रीशकारुण्यपूरात् ।

॥ श्रीः ॥

वाल्मीकेः गेयपरिस्पन्दः

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

'पाठ्ये गेये च मधुरम्' (1,4,8) इति स्वकृतिं श्रीमद्रामायणम् निर्दिष्टवान् तत्रभवान् कविकोकिलो वाल्मीकिः । तत्र पाठ्ये पठनविषये माधुर्यमेवमुपावर्णयत् । यथा ।

उदारवृत्तार्थपदैर्मनोहरैः
स तस्य रामस्य चकार कीर्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारधीर्मुनिः ॥ इति ।

तदुपगतसमाससन्धियोगं
सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितम् इति च (1,2,42,43)

पदवाक्यवृत्तगता अर्थगताश्चैते गुणाः कीदृशं माधुर्यं जनयन्तीति आबालवृद्धमद्य यावदनुभूयत एव । रस-भावनिबन्धनं तु माधुर्यं तत्तत्काव्यवासनापरिपाकमनुरुध्य भेदैः सहृदयैरुत्तरोत्तरमनुभूयत इति सुगृहीतोऽयं विषयः ।

काव्यसौन्दर्यमनुभवितुमनुभावयितुं च पाठ्यशिल्पमेव प्रधानमुपकरणमित्यभिप्रैति राजशेखरो महाकविः—

करोति काव्यं काव्येन संस्कृतात्मा यथा तथा ।
पठितुं यः परं वेत्ति तस्य सिद्धा सरस्वती ॥ इति
(का. मी.7)

कींच 'गेयगर्भे स्थितः पाठे सर्वोऽपि द्रविडः कविः' इति वदन् सः द्राविडपाठ्ये गेयगुणमुपहसतीव । अन्येऽपि केचन एवं भावयेयुर्नाम । वाल्मीकिस्तु रचयितुः पठितुश्च गेयधर्माभिनिवेशमावश्यकमुपदिशतीति सुस्पष्टमेव ।

युक्तं चैतत् । आम्नायसूक्तादारभ्य गद्यपद्यात्मकं सर्वमपि भारतं वाङ्मयमासृष्टेरद्यावधि स्वरसंनियोगेनैव गीयत इति संप्रदायविदां नायं नूतनो विषयः । गेयगुणाश्च पाठ्यगुणा इव यथोचितं यथाभ्यासं यथासन्दर्भं च निरूह्यन्ते । आंग्लसंप्रदायसंस्कृता आधुनिकाः केचित् पाठ्ये गेयं सर्वात्मना तिरस्कुर्वन्तीत्यन्यदेतत् ।

वाल्मीकेरन्यादृशी प्रतिभा काव्यरचनायां गानपरिस्पन्दे च निर्विशेषनिर्वेशा, उभयमपि परस्परोपस्कारतया सममेव निर्व्यूढवतीति शक्यते वक्तुम् । 'निषादविद्धाण्डज-दर्शनोत्थः' तस्य महान् शोकः शापाकृतिर्न केवलं श्लोक-रूपेण, किंतु गीतरूपेणापि हठान्निस्ससार मुखात् । स च शापश्लोकः 'पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः' इति

स्वयमेव विवृणोति कविः शिष्याय भरद्वाजाय। संनिहितस्य चतुर्मुखस्य सविधेऽपि मौनमालम्ब्य तमेव श्लोकमन्तर्गतमना उपजगौ। सर्वेऽपि वाल्मीकेः शिष्यास्तं तथैव जगृहुः जगुश्च। यदा समाक्षरैश्चतुर्भिः पादैर्निबद्धः शापः श्लोकरूपेण निसर्गादेव निस्सरन् नासान् विस्मापयति तदा किमपराध्यते तेन गीतेन? किं तु तस्य 'तन्त्रीलयसमन्वितः' इति विशेषणं किंचित् कण्ठे गड्यते। न खलु वयं भावयितुं शक्नुमः यथा वाल्मीकिः शापकालेऽपि वीणातन्त्रीर्वादयन्नासीदिति। स खलु तदा तमसातीर्थे स्नात्वा निवर्तमानोऽवर्तत। 'तन्त्र्यामारोप्य वाद्यैस्सह गातुं शक्यः' इत्यर्थं तत्र विवृण्वन् गोविन्दराजः किंचिदिव समाधत्ते नश्चित्तम्। किमन्यत्तत्र साम्प्रतरम्।

एवं रचितं प्रबन्धं वाल्मीकिनिदेशेन तस्य शिष्यौ कुशीलवौ कुशलवौ श्रीरामस्य पुरतः सभायामगायताम्। तयोर्गानं च तत 'मार्गविधानसम्पदा' प्रवर्तितमासीत्। संगीतलाक्षणिकाः मार्गो देशीति द्वेधा तां कलां विभज्य एवं हि विवृण्वते—

तत्र मार्गः स उच्यते

यो मार्गितो विरिञ्चाद्यैः प्रयुक्तो भरतादिभिः।
देवस्य पुरतः शम्भोर्नियताभ्युदयप्रदः॥

देशे देशे जनानां यद्रुच्या हृदयरञ्जकम् ।
गीतं च वादनं नृत्तं तद्देशीत्यभिधीयते ॥ इति ।

(सं. र. I. 1 22-24)

'देशीत्वं नाम कामचारप्रवर्तित्वम्' इत्येकवाक्येन देशीं निगमयति रत्नाकरव्याख्याता मल्लिनाथः ।

कालेन मार्गपद्धतिर्निसर्गेण नूतनप्रियलोकैरनादृता तिरोभवति । देशी तस्याः पदमधितिष्ठन्ती नूतनाया देश्याः प्रादुर्भावहेतुर्भवति । सापि तथैवेत्ययं विवर्तक्रमोऽविच्छिन्न एव प्रचलति । लोकव्यवहारदूरतया लक्ष्याणामन्तर्धानेन केवलं कतिचिल्लक्षणग्रन्थाः शुष्कवृक्षा इव परिशेषबहुमतिभाजो वर्तन्ते । समकालीनस्य देशीसंप्रदायस्य नूतनानि लक्षणानि च तदा तदा निबध्यन्ते ।

क्रिस्ताब्दानां त्रयोदशे शतके शार्ङ्गदेवो मार्गसंगीतं विस्तरेण लक्षयन् सङ्गीतरत्नाकरं नाम ग्रन्थं निबबन्ध । तां च कृतिं षोडशशतके गोविन्ददीक्षितः स्वस्य सङ्गीतसुधायां

'....लक्ष्मविरोधिलक्ष्यामबोधकात्यल्पतरप्रयोगाम् ।
अबोधितास्पष्टपदार्थभेदां त्यक्तामतो गायकवैणिकाद्यैः ॥'

इति निर्दिशन् निराचकार । अधुना गोविन्ददीक्षितकृतिरपि तथैव निराकरणीया निराकृता चेत्यत्र नास्ति

सन्देहः । एवमन्येऽपि तत्तत्कालीना लक्षणनिबन्धाः ।

पाठ्यस्य निबन्धस्य लिपिरस्ति । अतश्च लिपिमात्रं जानानाः सर्वेऽपि तं पठितुं प्रभवन्ति । सत्यं, पाठ्यस्य स्थूलमेव स्वरूपं लिपिर्ग्राहयति, न तु काकुप्रभृतीनि बहूनि मुख्यानि पाठरहस्यानि । न खलु वाचनशक्ताः सर्वेऽपि सम्यक् पठितुं प्रभवन्ति । पठनं पठितुः संस्कार-सौभाग्यमनुरुध्य तारतम्यविधया रसभावार्थानाविष्करोति । गेयस्य पुनर्बहुतिथं कालं भारते लिपिरेव नासीत् । केवलमाचार्यगानानुगानेन शिष्यैर्गेयानि ग्राह्याण्यासन् । प्रायः शतवत्सरेभ्योऽर्वागेव गेयानामपि काचन लिपिर्नाम निष्पन्ना । सापि पाठ्यलिपिरिव गेयस्य स्थविष्ठमेवाकारं व्यनक्ति ।

अतः श्रीमद्रामायणपाठ्यस्य वाल्मीकिना सङ्कल्पिता मार्गविधानगेयसंपत् सर्वथा दुरन्वेषा नष्टेति निश्चेतव्यमेव । अथवा कुतो वाल्मीकिपर्यन्तमनुधावनम् ? अतीवार्वाचीनानां जयदेवादिवाग्गेयकाराणां कृतिषु गीतगोविन्दादिष्वपि कविनिबद्धा गेयधर्मा अद्यास्माकमलभ्या एव ।

रामायणकाव्यस्य गेयं त्रिधा विशिनष्टि वाल्मीकिः

' प्रमाणैस्त्रिभिरन्वितम् ।
जातिभिः सप्तभिर्बद्धं
तन्त्रीलयसमन्वितम् ॥ ' इति । (I. 4-8)

तत्र कानि तानि प्रमाणानि ? 'त्र्यस्र, चतुरस्र, मिश्र-संज्ञकैः' इति गोविन्दराजटीका। त्र्यस्रादयो लयस्फोटका गुणाः त्रिमात्राकः त्र्यस्रः, चतुर्मात्रावान् चतुरस्रः, अनयोर्मिश्रणेन सम्पन्नः सप्तमात्राप्रमितो मिश्रः। पञ्चमात्राकं खण्डं नवमात्राकं संकीर्णमित्यधिकं प्रमाणद्वयं लक्ष्यलक्षणयोर्दृश्यते। तेषु प्रमाणत्रयमात्रे कुतोऽनुग्रहः, अन्ययोरनादरो वा वाल्मीकेः ? चतुरस्रखण्डयोः सङ्कर एवेति, विशेषशून्यमिति, सङ्कीर्णमुदास्यतां नाम। सर्वलोकप्रियस्य विशिष्टस्वरूपस्य खण्डस्य त्यागे को हेतुः ? अत एव मन्ये गोविन्दराजः 'द्रुतमध्यविलम्बितैर्वा' इति वैकल्पिकमर्थं तत्र प्रदर्शयति। किं तु चतुर्विंशतिसहस्रिकायामस्यां रामायणसंहितायां केषु केषु श्लोकेषु, कुत्र कुत्र कथं कथं वा तेषां प्रमाणानां विनिवेशो वाल्मीकिकल्पित इति प्रश्ने किमुत्तरम् ?

एवं 'जातिभिस्सप्तभिर्बद्धम्' इत्यत्रापि कास्ताः सप्त जातयः ? भरतमुनेर्नाट्यशास्त्रेऽष्टाविंशेऽध्याये जातीनां विवृतिर्दृश्यते। किंतु तत्र पाठस्य बहुधा कलुषितत्वेन, न मादृशां क्वापि स्फुटप्रतीतिर्जायते। रागभेदमूलभूतानां षड्जादिस्वरभेदानामारोहावरोहयोरानुपूर्व्येण निवेशनमेव जातिरिति केचिदभिप्रयन्ति। सा च षाड्जी आर्षभी इत्येवं सप्तभिः स्वरैर्गृहीता सप्तविधा भवतीति लाक्षणिकाः।

तत्र शुद्धा जातयस्सप्त विकृताः पुनरेकादश, आहत्य जातयोऽष्टादश इति निगमः। जातिरेव किलाद्य मेल इति व्यवह्रियते। रामायणे न कुत्रचिदपि 'राग' इति सांकेतिकशब्दो दृश्यते। यदि जातय एव राग-मूलानीति गृह्यते तदा कस्या जातेः केषु श्लोकेषु, कीदृशेन विन्यासेन, प्रयोगः? दुस्समाध एवायं प्रश्नः।

'तन्त्रीलयसमन्वितम्' इति रामायणगेयस्यान्यलक्षणम्। 'तन्त्रीशब्देन तन्त्रीयुक्तवीणा लक्ष्यते। लयशब्देन तालवेणुमृदङ्गादीनामेककालविराम उच्यते। ताभ्यां समन्वितम्' इति गोविन्दराजविवृतिः। कीदृशी सा वीणा? आधारश्रुतिमात्रप्रदायिनी तौम्बुरी, उत गीयमान-सर्वस्वरानुवादिनी विपञ्ची वा? किं सर्वत्र गानसमयेषु तालघः वैणविको मार्दङ्गिकश्च कुशलवौ अनुजग्मुरिति भाव नीयम्? किंच, तेषां तपोवनशिक्षिताभ्यां कुशलवाभ्यां कथं, कदा सहाध्यायः? अन्यथा कथं तत्क्रियाणामेककालविरामो निरुह्यते? अथ यदि लयशब्देन साम्यमात्रं विवक्षितं. तर्हि कस्य केन साम्यम्? सत्यमक्षरसंख्यासाम्यं काव्ये श्लोकपादेषु वर्तते। किंतु गीते तदकिंचित्करम्, यतो लघुगुरु-विभागभिन्नान्यक्षराणि भिन्नकालप्रमाणानि भवन्ति। मात्रा संख्यासाम्यमेव ननु गीते लयानुभवाय कल्पते? दृश्यताम्, आनुष्टुभे श्लोके क्वचिदेकादश, कुत्रचिद् द्वादश, इत्येवं

पञ्चदशपर्यन्तं पादेषु मात्रा भिद्यन्ते। एवं वृत्तान्तरेष्वपि। कथं तत्र साम्यनिर्वाहः? गुरुलघुवर्णानां संकोचेन व्याकोचेन च मात्रासाम्यं शक्यते साधयितुं, किंतु तत् पाठ्यं हिनस्ति। कुशलवयोः काव्यगानं श्रोतारो मुनयः 'अहो गीतस्य माधुर्यं श्लोकानां तु विशेषतः' (I. 4. 17) इति किल पाठ्यमाधुर्यमपि प्रशशंसुः। अतः 'तन्त्रीलयसमन्वितमित्यत्र' सर्वत्र 'तन्त्रीनादेन सह शारीरनादस्य लयः साम्यम्' इति विवृतिः सुग्रहा।

क्वचित् कुशलवगानं 'समतालसमन्वितम्' (VII. 71. 15) 'तालल्योपपन्नम्' इत्यपि विशेषितम्। लयबद्धानां चतुरस्रादिगणानां प्रत्यावर्तं च समसंख्यया निवेशः, सशब्दनिश्शब्दक्रियाभिस्तस्य स्फोरणं च ताल इत्युच्यते। स च बहुविधः। रामायणे कति, के वा तालाः कुत्र निवेशिता इति लेशतोऽपि न सूच्यते।

परं त्विदमत्र निश्चप्रचम्। भगवतः प्राचेतसस्य चिद्-चिन्मयं विश्वमेव सङ्गीतमयम्। तथा हि—श्रीरामावतारसमये 'जगुः कलं च गन्धर्वाः ननृतुश्चाप्सरो गणाः' इति (I. 18. 15) नैतद्विस्मयास्पदम्, यतो गन्धर्वाश्चाप्सरसो वा नान्यं कमपि व्यापारमनुसंधातुमुचिताः। किंत्वयोध्यायाम्

रथ्याश्च जनतंबाधा नटनर्तकसङ्कुलाः ।
गायनैश्च विरविण्यो वादनैश्च तथापरैः ॥ (I.8.17)

अन्यदा च सा नगरी 'दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा नादिता भृशम्' (I. 5· 18) श्रीरामचन्द्रस्तु न केवलं 'सम्यग्विद्याव्रतस्नातः' (II. 2. 34) किंतु विशिष्य 'गान्धर्वे च भुवि श्रेष्ठः'। (II. 2. 35) वानरराष्ट्रे किष्किन्धायां 'गीतवादित्रनिर्घोषो मृदङ्गाडम्बरैः सह' (IV, 27, 27) सदा श्रूयते स्म। लक्ष्मणो महता कोपेन सुग्रीवं दण्डयितुं तदन्तःपुरं

प्रविशन्नेव सततं शुश्राव मधुरस्वरम् ।
तन्त्रीगीतसमाकीर्णं समगीत (ताल) पदाक्षरम् ॥
(IV, 33, 21)

सीतां विचेतुं भवनाद्भवनं लङ्कायां रात्रौ गच्छन् हनुमान्

शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् ।
स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव ॥
(V, 4, 10, 11)

रावणान्तःपुरे रात्रौ पानक्रीडापरिश्रान्तानां निद्राणानां राक्षसीनां (यथा) हनुमता नेत्रपात्रीकृतमिदं चित्रम् । यथा —

अङ्गहारैस्तथैवान्या कोमलैर्नृत्तशालिनी ।
विन्यस्ताशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥

काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते ।
महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥

अन्या कक्षगतेनैव मड्डुकेनासितेक्षणा ।
प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥

पटहं चारुसर्वाङ्गी पीड्य शेते शुभस्तनी ।
चिरस्य रमणं लब्ध्वा परिष्वज्येव भामिनी ॥

काचिद्वंशं परिष्वज्य सुप्ता कमललोचना ।
रहः प्रियतमं गृह्य सकामेव च कामिनी ॥

विपञ्चीं परिगृह्यान्या नियता नृत्तशालिनी ।
निद्रावशमनुप्राप्ता सहकान्तेव भामिनी ॥

अन्या कनकसंकाशैर्मृदुपीनैर्मनोरमैः ।
मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्तलोचना ॥

भुजपार्श्वान्तरस्थेन कक्षगेन कृशोदरी ।
पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥

डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा ।
प्रसुप्ता तरुणं वत्समुपगूह्येव भामिनी ॥

काचिदाडम्बरं नारी भुजसंयोगपीडितम् ।
कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥

कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी ।
वसन्ते पुष्पशबला मालेव परिमार्जिता ॥ इति ।

(V, 10, 36-46)

एवमन्यानपि

वातोद्यानि विचित्राणि परिष्वज्यापराः स्त्रियः ।
निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥
(V 10 49)

ईदृशं सङ्गीतसाम्राज्यमधितिष्ठन् रावणः सीतां प्रलोभयितुं 'गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि' (V 20 10) इति सगर्वं सप्रत्याशं च प्रतिजानातीति किमत्र चित्रम् ? किं विस्तरेण ? वाल्मीकेर्भावनायां, पम्पातीरे,

मत्तकोकिलसन्नादैर्नर्तयन्निव पादपान् ।
शैलकन्दरनिष्क्रान्तः प्रगीत इव चानिलः ॥

पुष्पसंछन्नशिखरा मारुतोत्क्षेपचञ्चलाः ।
अमी मधुकरोत्तंसाः प्रगीता इव पादपाः ॥
(IV, 1, 15, 20)

वर्षासु गिरिगुहासु विश्राम्यतो जानकीवियोगविधुरस्यापि रामस्य भावनापथे

षट्पादतन्त्रीमधुराभिधानं
प्लवङ्गमोदीरितकण्ठतालम् ।
आविष्कृतं मेघमृदङ्गनादै-
र्वनेषु सङ्गीतमिव प्रवृत्तम् ॥

(IV, 28, 36)

ईदृशोऽनन्यकाव्यसामान्यो महान् गेयराशिः सर्वथानुद्धरणीय एव नष्ट इति कियद्वा शोच्यते भारतस्य भवितव्यता। अथवा किं विधेरनतिक्रमणीयस्य निन्दनेन? विषादमात्रफलेन निर्वेदेन वा? अस्ति महानस्माकमद्याप्यनन्यसामान्यः सङ्गीतपरिस्पन्दः। स मार्गविधानसम्पत् मा भून्नाम। अद्यतनदेशीयपथेनैव यथारुचि यथाशक्ति च गायन्तः पठन्तश्च श्रीरामायणं कृतिनो भवाम।

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम्।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम्॥
(I, 2, 43)

प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्।
(VII, 111, 25)

न्यासकळानिधिस्तवः

प्रपद्ये शरणं श्रीमन्नारायण दयानिधे ।
निश्चित्य त्वत्पदाम्भोजनिखिलामयभेषजम् ॥

श्रीकरार्पित संवाहद्विगुणामोदमार्दवम् ।
सदा पदाम्बुजातन्ते शिरोभूषणमस्तु नः ॥

आधिव्याधिभरक्लिष्ट शरीरेन्द्रियचेतसाम् ।
अस्माकं त्वत्पदाम्भोजप्रपत्तिरमृतायताम् ॥

अनन्यशरणाभक्तिरमन्देहभया त्वयी ।
अस्मदालम्बनं भूयादपायेष्वनपायिनी ॥

रक्षकस्त्वं वयं रक्ष्या बन्धेऽस्मिन् भवदीप्सिते ।
श्रद्धा बध्नातु नः शुद्धा त्वत्कृपैकप्रसारिणी ॥

त्वदायत्तास्त्वदाज्ञप्तास्त्वत्परास्सकलाः क्रियाः ।
सदा स्फुरन्तु नश्चित्ते चलंतु च फलंतु च ॥

त्वदीयामोघसंकल्पघण्टापथपलायितान् ।
मा निरुंध्युः कदाप्यस्मानन्यसङ्कल्पकण्टकाः ॥

चित्ते भक्तिसुधास्विन्ने प्रपित्सूनां सदापि नः ।
भूयात्संमुद्रिता मूर्तिस्तव मुग्धमनोहरा ॥

अनन्तैरद्भुतैर्नित्यमनुक्रमविकासिभिः ।
क्षुद्रमस्मन्मनोव्योम विस्तारय निजैर्गुणैः ॥

अपारेऽतिगभीरे त्वत्प्रभावामृतसागरे ।
शिक्षय प्लुवनक्रीडामवलम्ब्य त्वमेव नः ॥

कृत्याकृत्यविवेकेषु धुन्वती तिमिरं दृशि ।
अस्मत्सर्वस्वमाविध्य वर्तयेद्विभुता तव ॥

अनामयमदीनत्वमनुत्सेकमदम्भताम् ।
आदधातु भवानस्मास्वात्मकैङ्कर्यपूर्तये ॥

अनिर्वेदमसिद्धेषु साधितेष्वनहंकृतिम् ।
अनालस्यं च साध्येषु कृत्येष्वनुगृहाण नः ॥

स्वच्छन्दं भवतश्छन्दे पारवश्यं भवद्वशे ।
पश्यतां नस्सदा चित्तं समाधत्तां शमाध्वनि ॥

निसर्गाद्भ्रश्यतां धर्मे निर्वेदालम्बगामिनाम् ।
एकस्तव क्षमास्माकमालम्बः पातहेतुषु ॥

सर्वत्रोत्पश्यतां भीतिम् सदा स्फुरतु नो हृदि ।
सर्ववात्सल्यमधुरा सर्वान्तर्यामिता तव ॥

स्वयं स्वप्रीतये श्रीमान् इमं न्यासकळानिधिम् ।
सदयोनन्तकृष्णस्य वदनादुददीधरत् ॥